# श्री मीनाक्षी पंचरत्नं

उद्यद्भानु सहस्रकोटि सदृशां, केयूर हारोज्ज्वलां
बिंबोष्ठीं स्मितदंत पंक्तिरुचिरां पीतांबरालंकृताम् ।
विष्णु ब्रह्म सुरेंद्र सेवितपदां तत्त्व स्वरूपां शिवां
मीनाक्षीं प्रणतोऽस्मि संतत महं, कारुण्यवारांनिधिम् ॥ 1

मुक्ताहार लसत्किरीट रुचिरां पूर्णेंदु वक्त्रप्रभां
शिंजन् नूपुर किंकिणीमणिधरां, पद्मप्रभा भासुराम् ।
सर्वाभीष्ट फलप्रदां गिरिसुतां, वाणी रमासेवितां
मीनाक्षीं प्रणतोऽस्मि संतत महं, कारुण्यवारांनिधिम् ॥ 2

श्रीविद्यां शिववामभागनिलयां, ह्रींकारमंत्रोज्ज्वलां
श्रीचक्रांकितबिंदुमध्यवसतिं, श्रीमत् सभानायकीम् ।
श्रीमत् षण्मुखविघ्नराज जननीं, श्रीमज्जगन्मोहिनीं
मीनाक्षीं प्रणतोऽस्मि संतत महं कारुण्यवारांनिधिम् ॥ 3

श्रीमत्सुंदर नायकीं भयहरां, ज्ञानप्रदां निर्मलां
श्यामाभां कमलासनार्चितपदां, नारायण स्यानुजाम् ।
वीणावेणुमृदंग वाद्यरसिकां, नानाविधामंबिकां
मीनाक्षीं प्रणतोऽस्मि संतत महं कारुण्यवारांनिधिम् ॥ 4

© 2022 Vedam Nadam

नानायोगि मुनींद्र हृन्निवसतिं, नानार्थसिद्धिप्रदां
नानापुष्प विराजितांघ्रि युगळां, नारायणे नार्चिताम् ।
नादब्रह्ममयीं परात्परतरां, नानार्थ तत्वात्मिकां
मीनाक्षीं प्रणतोऽस्मि संतत महं कारुण्यवारांनिधिम् ॥ 5

॥ इति श्रीमच्छंकरभगवतः कृतौ श्री मीनाक्षी पंचरत्नं संपूर्णम् ॥

© 2022 Vedam Nadam